# स्मृत्युक्तशिक्षाविमर्शः

**S.N. Krishna**


### Abstract

सांसारिकबन्धमुक्तये अध्यात्मज्ञानार्जुनाय चोपनिषदः स्मृतयः प्रमाणभूतास्सन्ति। योगिनो अध्यात्मवेत्तारश्च अत्रैव ज्ञानं लभन्ते। वैदिकधर्मस्य अध्यात्मिकज्ञानगौरवोद्घोषं कुर्वन्त्य स्मृतयः भारतीयां चिन्तनधरां संस्कृतिश्चाखिलविश्वे प्रसारयन्ति। वेदानन्तरं धर्मस्य प्रामाण्यप्रतिपादने धर्मशास्त्र भूमिका अनन्या। अस्मिन् क्षेत्रे धर्मशास्त्रस्य संज्ञा भवति स्मृतिः।

यत् उक्तमस्ति मनुना- २|१० :

"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥" इति।

वेदस्य भिन्नविभागान् स्मृत्वा ऋषयो बहुशास्त्राणि रचितवन्तः। अतः वेद-संभूत-समस्त-शास्त्रस्य संज्ञा स्मृतिः भवेत्। स्मृतेः आचारः। ततः आत्मतुष्टिरिति प्रमाणं भवति।

अस्माकं प्रचीनैः स्मृतिकारैः अध्ययनस्य कालः स्पष्टं प्रतिपादितोऽस्ति। अध्ययनमध्यापनमपि महत्त्वपूर्णं कार्यमिति शास्त्रकारैः उक्तमस्ति। स्मृत्यनुरोधेन यः कालः निर्दिष्टः सः कालः ग्राह्योभवति। विशेष्यः शास्त्राध्ययनं तु प्राचीननपरम्परानुसारेण कर्तव्यम् इति॥


जगति सर्वेषां मानवानां कृते आदौ विद्या आवश्यकी। बाल्यावस्थायां निर्मलमनसा विद्येव ग्राह्यते, न तु धनं न वा अन्यत् किमपि।विद्यया अन्यत् सर्वं साधयति मानवः क्रमशः। यतोहि "विद्या समं नास्ति शरीरभूषणम्", "विद्या धनं सर्वधनप्रधानम्" इत्यादि सूक्तयः श्रूयन्ते।

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।
तृतीये नार्जितो धर्मः चतुर्थे किं करिष्यति ॥

इति प्रसिद्धवाक्यात् ज्ञायते विद्या आवश्यकी इति। सेयं विद्या गुरुभ्यः पितृभ्यश्च प्राप्यते। यत् अध्ययनमध्यापनमपि महत्त्वपूर्णं कार्यमिति शास्त्रकारैः उक्तमस्ति। महत्त्वपूर्णकार्याय कश्चन कालः निर्दिष्टो भवति। येन समुचिते काले अधीयते चेत् साफल्यं प्राप्यते।

अस्माकं प्राचीनैः स्मृतिकारैः अध्ययनस्य कालः स्पष्टं प्रतिपादितोऽस्ति। अध्ययनार्थमुक्ते काले एव अध्ययनस्य प्रामाणिकत्वं वर्तते। यः समयः अनध्यायः इति

निर्दिष्टः तस्मिन् काले अध्ययनं क्रियते चेत् हानिर्भवति। किञ्च मनोवैज्ञानिक, वैज्ञानिकदृष्ट्याऽपि स कालः वस्तुतः त्याज्यो भवति।

इयमनध्यायपरम्परा न केवलं भारतीयसंस्कृतौ अपि च अन्येषां संस्कृतावपि दृश्यते। अध्ययनमध्यापनं वा गुरुशिष्ययोर्मानसिकीमेकाग्रतां, मिथसम्बन्धतां चानुकूलतां च नितरामपेक्षते। किञ्च कार्यमिदं गुरुशिष्ययोः आन्तरिकं तत्त्वं उत्कलयति, यत् कार्यमन्तः सम्बन्धेन जायते तत् कार्यं कर्तुं कश्चन समीचीनः कालः अपेक्षितो भवति।

**अनध्यायः काल :**

अनध्यायः कालः कः इत्युक्ते आदौ अस्माकं स्मृतिकारैः एवं रूपेण प्रतिपाद्यते। यथा[१] - **मनु**

इमान् नित्यमनध्यायानधीयमानो विवर्जयेत्।
अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकम्॥इति।

अस्मिन् कलिकाले तावद् यथावत् अनध्यायपालनस्य अशक्यत्वात् प्रतिपद्द्वयमष्टमीद्वयं चतुर्दशीद्वयं पूर्णिमासदर्शोऽयन संक्रान्तिरित्येतावन्तः एव अनध्याय कालत्वेन प्रोक्ताः। अनध्यायकालविषये एतासु तिथिषु अध्ययनं न करणीयम्। एवमेव **शङ्खस्मृतावपि** उच्यते [२] -

चतुर्दशीं पञ्चदशीमष्टमीं राहुसूतकम्। इति।

अर्थात् चतुर्दशी - पञ्चदशी - अष्टमी - ग्रहणेषु च अध्ययनं त्याज्यमिति। किञ्च शातातपवचनं**स्मृतिचन्द्रिकायां**उदाहृतंभवति-

पञ्चदश्यांचतुर्दश्यामष्टकासु महोत्सवे।
प्रदोषे च त्रयोदश्यामष्टम्यां प्रतिपद्यपि॥ इति[३]

एताः तिथयः अध्ययनानर्हाः इति हेतोः न ग्राह्यः।

**विष्णुपुराणेऽपि**[४] एवं दृश्यते -

चतुर्दश्यष्टमी चैव तथामा चाथ पूर्णिमा।
पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च॥

इत्यनेन ज्ञातं भवति - चतुर्दशी - अष्टमी - अमावास्या - पूर्णिमा - रविसंक्रमणेषु च न अध्येतव्यं शास्त्रमिति। **नारदीयपुराण**ऽभिप्रायः च अयम्[५] -

अयने विषुवे चैव शयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु॥

इति एतेन अयनारम्भदिवसे, विषुवसंक्रान्तौ, हरेः शयनबोधनादिवसयोः च अनध्यायः पाल्यते। **श्रीमद्रामायणेऽपि** श्रीरामचन्द्रं प्रति हनुमता उक्तम्[६]

सा प्रकृत्यैव तन्वाङ्गी तद्वियोगाच्च कर्शिता।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ इति

एवं प्रकारेण बहुषु स्मृतिषु, पुराणेषु च अनध्यायकालस्य वैषम्यं परिलक्ष्यते।

किञ्च तिथ्यनध्यायकालान् त्यक्त्वा तात्कालिकानध्यायाः, उत्सवानध्यायाः स्थानानध्यायश्चेत्यादि भेदेन अनध्यायःदशविधः। प्राचीनकाले शिक्षणसत्रे तिथ्यनध्यायाः, तात्कालिकानाध्यायाः, स्थानानध्यायाः, उत्सवानध्यायाश्चेति चतुर्धा प्रधानत्वेन आसन्।

**अध्ययन कालः**

शैक्षिककाले अनध्यायदिनानि त्यक्त्वा अन्येषु सर्वेषु दिनेषु अध्ययनं भवति स्म। तत्राध्ययनं यदा कदा आरब्धुं न शक्यते स्म। तदर्थं वेदबोधितः कश्चन नियमः निर्दिष्ट आसीत्।अतः निर्दिष्टेऽस्मिन् दिने अध्ययनं प्रारम्भणीयमासीत्।अतः मनुना उक्तम्[७]–

श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य यथाविधि।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्" ॥ इति।

श्रावणमासस्य भाद्रपदमासस्य वा पूर्णिमायां तिथौ उपाकर्म विधाय सार्द्धचतुरो मासान् शास्त्राध्ययनार्थमुद्युक्तो भवेत्। पुनश्च कदा अध्ययनं समापनीयमित्युक्ते मनुना उक्तं यत्[८]-

पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ इति

ततः पक्षयुक्तेषु चतुर्षु मासेषु यः पुष्यस्तत्र अध्ययनं समापनीयम्।

याज्ञवल्क्य वचनं**स्मृतिचन्द्रिकायाम्** उदाहृतंभवति-

अध्ययानामुपाकर्म श्रावण्यां श्रवणेन वा।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥

अधीयन्त इत्याध्यया वेदाः। तेषामुपाकर्माख्यं कर्म श्रावण्यां पौर्णमास्यां श्रवणेन वा नक्षत्रेण हस्तेन वा युक्तानां पञ्चम्यामोषधिप्रादुर्भावे सति कार्यम्।

अस्माकं शास्त्रकारैः यः कालः अध्ययनार्थं निर्दिष्टः वर्तते, तस्मिन् अर्वाचीनानां नास्ति विश्वासः। वस्तुतः अर्वाचीनाः वयं पाश्चात्यनियमान् पालयामः। तेषामिष्टानुसारमध्ययनमस्माभिः क्रियते, येन लाभः प्राप्येत। पुनः अधीतं ज्ञानं चिरं न तिष्ठेत्।

आधुनिकशिक्षापद्धतौ अध्ययनमध्यापनञ्च न तु गुरुशिष्ययोः अधीने वर्तते।

नचाचाराधीने अपि तु इदं महत्कार्यं राष्ट्रीयशिक्षापरिषदः (NCERT - National Council of Educational Research and Training) अधीने वर्तते। तादृशसंस्थाभिः कृताः नियमाः बहुषु स्थलेषु पालनीयाः भवन्ति। शिक्षाजगति एवं दृश्यते

यदध्ययनार्थं यः पाठ्यक्रमः प्रचलन् वर्तते, स तावत् सीमतः, परन्तु सङ्कुचित कालसीमाधीनत्वात् सः पाठ्यक्रमः बहुः इति अनुमीयते।

एवञ्च निर्दिष्टे समये पाठ्यक्रमः समापनीयो भवति। प्राचीनस्मृति कालिकाध्यायदिनेषु अध्ययनं क्रियते चेत् महतीहानिर्भवति उभयोः गुरुशिष्ययोः। अतः भगवतमनुना उच्यते[९]-

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी।
ब्रह्माष्टका - पौर्णमास्यौ तस्मात्ताः परिवर्जयेत् " ॥ इति।

अमावास्या गुरुं हन्ति, शिष्यं हन्ति चतुर्दशी, अष्टमी पूर्णिमा च ज्ञानं विस्मारयतः। अपि च बोधायनधर्मसूत्रे उच्यते "प्रतिपत् पाठनाशिनी,तस्मात् पर्वणि वर्जयेत्" इति। अत्र किमर्थमेवमुक्तमस्ति चेत् वैज्ञानिकदृष्ट्या विचार्यमाणे सति पूर्णिमायां चन्द्रस्य आकर्षणेन समुद्रेषु प्रबलतरङ्गाः जायन्ते। समुद्रजलेन सह मानवशरीरे विद्यमानस्य रक्तभागस्य महत्साम्यमस्ति। मानवशरीरे रक्तादिरूपेण जलभागस्य गुरुत्वं (५०-६०) अंशो भवति। यथा समुद्रे तरङ्गाः जायन्ते तथा मानवस्य शरीरेऽपि जायमानाःतरङ्गसदृश रूपविकाराः भौतिक-शारीरकजीवरसायनविकृतिं जनयन्ति। अनेन मस्तिष्कमपि प्रभावितं भवति। तस्मिन् समये अध्ययनं क्रियते चेत् निष्फलं भवति। पौर्णिमायामामयां च मानसिकदौर्बल्यत्वात् मानसिकविकार ग्रस्थाः भवन्ति। **ऋग्वेदेऽपि**[१०] - "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत" । इति अर्थात् मनसा सह चन्द्रस्य संबन्धोऽस्ति। मनसः जात अयं चन्द्रः बुद्धेः वृद्धिक्षयहेतुर्भवति ।अमावास्यां चन्द्रस्य प्रभावेन शारीरकक्रिया मन्दा भवति। तेन शक्तिश्च अत्यन्तं हीना भवति। एतत् प्रमाणीकृतमस्ति यत् अमायां सूर्योपरागे यदि पुत्रो जायते, तर्हि तस्य जीवनं दीर्घं न भवति। अतः यदि तस्मिन् दिने बलं क्षीयते, तर्हि कथं वा अध्ययनं सम्भवेत्? अतः मनोवैज्ञानिकदृष्ट्या विचारः क्रियते चेत्, तदा अध्ययनं भवेत् सदा सः शारीरक - मानसीक - बौद्धिक स्तरेषु स्वस्थो भवति। मानसीकस्वस्थे शिक्षा नैव सम्भवति। अतः छात्रस्य समीचीनस्वास्थ्यमावश्यकम्, तेन सह परिसरोऽपि अपेक्षित इति मनोवैज्ञानिकैः उक्तमस्ति।

प्राकृतिकपरिसरः छात्रेषु कञ्चन प्रभावं पातयति। एवञ्च यदा मानवस्य मानसीक स्थितिः समीचीना भवति तदा अध्ययनं करणीयम्। स्मृत्यानुरोधेन यः कालः निर्दिष्टःसः कालः ग्राह्यो भवति। अनेनाधीतं ज्ञानं दृढंभवति। स्मृतिरीत्या अध्ययनकाले अध्ययनं कृत्वा अवशिष्टेषु मासेषु समाजसेवादि कार्येषु मनः निवेशनीयम्। किञ्च शैक्षणिक क्षेत्रे जायमानानां समस्यानामुपरि शोधकार्यं कृत्वा नूतन तथ्यानामाविष्कारः करणीयो भवति। अतः स्मृतिरीत्या अध्ययनमध्यापने साम्प्रतिककाले भवतः चेत्, शास्त्राणां वास्तविकाध्ययनं भवितुमर्हति। विशेषतः शास्त्राणामध्ययनं तु प्राचीन परम्परानुसारेण कर्तव्यम्। प्राक् प्रपञ्चितशिक्षासत्रमेव शास्त्राय च सुखाय च कल्पेत इति॥

## BIBLIOGRAPHY

1. *Aṣṭādaśasmṛti*, Sri Venkateswara Press, Mumbai.
2. *Manusmṛti*, Nirnayasagar Press, Mumbai, 1946.
3. *Smṛticandrikā*,by Devana Bhatta, ed. by L.Srinivaasacharya, Government Oriental Library Series. 43, Mysore, 1914.
4. *VālmīkiRāmāyaṇa,* (Southern Readings) ed. by T.R. Krishnacharya, the Hindi Prachar Press, Madras, 1980.
5. *Viṣṇupurāṇa*, Gitapress, Gorakhpur.

## *ENDNOTES :*

1 मनु . स्मृ. ४. १०२

2 शङ्खस्मृतिः. ३ अ. ७

3 स्मृ.च . पृ.१५५

4 विष्णुपुराण.१. ३. ११. ११६

5 स्मृ. च . पृ. १५६

6 सु . का . ५९. ३४

7 मनु . ४ . ९५

8 मनु. ४ . ९६ ; स्मृ.च . पृ. १४५

9 मनु .४ . २२४

10 ऋग्वेद. १० . ९ . १३

***